॥ श्रीगुरुभ्यो नमः ॥

॥ ॐ श्रीमहागणाधिपतये नमः ॥

॥ श्रीमच्चरणवैभवायै नमः ॥

## ॥ श्रीयोगीश्वरयाज्ञवल्क्यकृतं श्रीसूर्यकवचम् ॥

ॐ श्रृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ।
शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम् ॥ १
देदीप्यमानमकुटं स्फुरन्मकरकुण्डलम् ।
ध्यात्वा सहस्त्रकिरणं स्तोत्रमेतदुदीरयेत् ॥ २
शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः।
नेत्रे दिनमणिः पातु श्रवणे वासरेश्वरः ॥ ३
घ्राणं कर्मघृणिः पातु वदनं वेदवाहनः ।
जिह्वां मे मानदः पातु कण्ठं मे सुरवन्दितः ॥ ४
स्कन्धौ प्रभाकरः पातु वक्षः पातु जनप्रियः ।
पातु पादौ द्वादशात्मा सर्वाङ्गं सकलेश्वरः ॥ ५
सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके ।
दधाति यः करे तस्य वशगाः सर्वसिद्धयः ॥ ६
सुस्नातो यो जपेत् सम्यक् योऽधीते स्वस्थमानसः।
स रोगमुक्तो दीर्घायुः सुखं पुष्टिं च विन्दति ॥ ७

॥ श्रीयोगीश्वरयाज्ञवल्क्यकृतं श्रीसूर्यकवचं संपूर्णम् ॥